अर्हः, पुं, (अर्ह + अच् ।) इन्द्रः । इति शब्दरत्नावली ॥

अर्हः, त्रि, (अर्ह + अच् ।) योग्यः । उपयुक्तः । यथा,—
"तस्मान्नार्हा वयं हन्तुं धार्त्तराष्ट्रान् सबान्धवान्"।
इति श्रीभगवद्गीता ॥

अर्हणा, स्त्री, (अर्ह + युच् + टाप् ।) पूजा । इत्यमरः ॥
("अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे" ।
इति रघुवंशे ।)

अर्हन्, [त्] पुं, (अर्हः प्रशंसायां शतृ ।) क्षपणकः । बुद्धः । इति मेदिनी ॥ शेषस्य पर्य्यायः । जिनः २ पारगतः ३ त्रिकालवित् ४ क्षीणाष्टकर्म्मा ५ परमेष्ठी ६ अधीश्वरः ७ शम्भुः ८ स्वयम्भूः ९ भगवान् १० जगत्प्रभुः ११ तीर्थङ्करः १२ तीर्थकरः १३ जिनेश्वरः १४ वादी १५ अभयदः १६ सार्व्वः १७ सर्व्वज्ञः १८ सर्व्वदर्शी १९ केवली २० देवाधिदेवः २१ बोधदः २२ पुरुषोत्तमः २३ वीतरागाप्तः २४ । इति हेमचन्द्रः ॥

अर्हन्, (त्) त्रि, (अर्ह + शतृ ।) पूज्यः । मान्यः । इति मेदिनी ॥ स्तुतः । इति शब्दरत्नावली ॥
("यदध्यासितमर्हद्भिस्तद्धि तीर्थं प्रचक्षते"।
इति कुमारसम्भवे ।
"त्वमर्हतामग्रसरः स्मृतोऽसि नः" ।
इति शाकुन्तले ।)

अर्हन्तः, पुं, (अर्ह + बाहुलकात् झच् ।) बुद्धः । क्षपणकः । मान्ये त्रि । इति जटाधरः ॥ शिवः । इति शब्दरत्नावली ॥

अर्हितः, त्रि, (अर्ह + क्त ।) पूजितः । इत्यमरः ॥

अल ञ वारणपर्य्याप्तिभूषासु (भ्वादिं-उभं-सकं ।) इति कविकल्पद्रुमः ॥ ञ अलति अलते पापं गङ्गा निवारयतीत्यर्थः । पर्य्याप्तिः सामर्थ्यं ।
"पर्य्याप्तन्तु यथेष्टं स्यात् तृप्ते शक्ते निवारणे" ।
इति विश्वप्रकाशात् । अलति घोटको धावितुं समर्थः स्यादित्यर्थः । अलति हारो जनं भूषयति इत्यर्थः । इति दुर्गादासः ॥

अलं, स्त्री, (अल + अच् ।) वृश्चिकपुच्छकण्टकः । इति हेमचन्द्रः । विछार डुल इति भाषा । हरितालं । इति रत्नमाला अमरटीका च ॥

अलं, व्य, भूषणं । पर्य्याप्तिः । वारणं । निरर्थकं । शक्तिः । इति मेदिनी ॥ अत्यर्थं । यथा,—
"सर्वं मे विमलं वदामलमलं गोलं विजानासि चेत्" । इति लीलावती ॥

अलकः, पुं, स्त्री, (अलति भूषयति मुखं, अल + कुन् ।) भङ्गियुतः केशः । कर्पूरादेः क्षोदश्चूर्णं तस्य कुन्तलाश्चूर्णकुन्तलाः तद्धि तत्र न्यस्यते इत्यन्ये । अलति भूषयति मुखं इत्यलकं । इति भरतः ॥ कुटिलकुन्तलः । इति सुभूतिः । इति सारसुन्दरी ॥ तत्पर्य्यायः । चूर्णकुन्तलः २ । इत्यमरः ।
("कर्णेषु योग्यं नवकर्णिकारं
स्तनेषु हारा अलकेष्वशोकः" ।
इति ऋतुसंहारे ।
"हस्ते लीलाकमलमलके बालकुन्दानुविद्धं"।
इति मेघदूते ।)

अलर्कः, पुं, (अल + कुन् ।) अलर्कः । छिन्नकुक्कुरः । इत्यमरटीकायां रायमुकुटः ॥

अलकनन्दा, स्त्री, (अलति पर्य्याप्नोति, अल + कुन्, अलका, नन्दयति इति अच् नन्दा, अलका चासौ नन्दा चेति इति इति कर्म्मधारयः ।) कुमारी । इति त्रिकाण्डशेषः ॥ भारतवर्षीयगङ्गा । इति शब्दमाला ॥ "तथैवालकनन्दा दक्षिणेन तु ब्रह्मसदनाद्बहूनि गिरिकूटान्यतिक्रम्य निषध-हेमकूट-हिमकूटान्यतिरभसतररंहसा लुठन्ती भारतमपि वर्षं दक्षिणस्यां दिशि लवणजलधिमभिप्रविशति" । इति श्रीभागवतं ॥
(हिमालयादुत्पन्ना श्रीनगरस्यादूरे गङ्गया सह मिलिता स्वनामख्याता नदी । गङ्गैव देवलोके अलकनन्देत्युच्यते । इति महाभारते । यदुक्तं,--
"देवेषु गङ्गा गन्धर्व्व ! प्राप्नोत्यलकनन्दताम् ।
तथैवालकनन्दापि दक्षिणेनेति भारतं ।
प्रयाति सागरं भूत्वा सप्तभेदा महामुने" ॥
इति भागवतपुराणे ।)

अलकप्रभा, स्त्री, (अलका पर्य्याप्ता प्रभा यस्याः सा ।) कुवेरपुरी । इति शब्दरत्नावली ॥

अलकप्रियः, पुं, (अलकान् प्रीणाति अलक + प्री + क ।) वृक्षविशेषः । इति जटाधरः ॥

अलका, स्त्री, (अल + कुन् + टाप् ।) कुवेरनगरी । इत्यमरः ॥ अष्टवर्षावधिदशवर्षपर्य्यन्तवयस्का कन्या । इति शब्दरत्नावली ॥

अलकाधिपः, पुं, (अलकाया अधिपः, षष्ठीतत्पुरुषः ।) कुवेरः । इति जटाधरः ॥

अलकाधिपतिः, पुं, (अलकाया अधिपतिः, षष्ठीतत्पुरुषः ।) कुवेरः । इति शब्दरत्नावली ॥

अलक्तः, पुं, (न रक्तोऽस्मात्, रस्य लत्वं ।) वृक्षनिर्यासविशेषः । लाक्षा । जौ इति च भाषा । तत्पर्य्यायः । राक्षा २ लाक्षा ३ जतु ४ यावः ५ द्रुमामयः ६ । इत्यमरः ॥ रक्षा ७ । इति भरतः ॥ अरक्तः ८ । इत्यमरटीकायां भरतः ॥ जतुकं ९ यावकः १० अलक्तकः ११ रक्तः १२ । इति शब्दरत्नावली ॥ पलङ्कषा १३ क्षमिः १४ वरवर्णिनी १५ । इति जटाधरः ॥ तस्य गुणादिः ।
"लाक्षा पलङ्कषालक्तौ यावो वृक्षामयो जतु ।
लाक्षा वर्ण्या हिमा बल्या स्निग्धा च तुवरा लघुः ॥
अनुष्णा कफपित्तास्रहिक्काकासज्वरप्रणुत् ।
व्रणोरःक्षतवीसर्पकृमिकुष्ठगदापहा ॥
अलक्तको गुणैस्तद्वद्विशेषाद्व्यङ्गनाशनः" ।
इति भावप्रकाशः ॥*॥ लाक्षारसः । आलता इति भाषा । तत्पर्य्यायः । अलक्तकः २ जतुरसः ३ रागः ४ निर्भर्त्सनः ५ जननी ६ जनकरी ७ सम्पद्या ८ चक्रवर्त्तिनी ९ । अस्य गुणाः । तिक्तत्वं । उष्णत्वं । कफवातरोगव्रणदोषनाशित्वं । कण्ठरोगशमनत्वं । रुचिकारित्वञ्च । इति राजनिर्घण्टः ॥

अलक्तकः, पुं, (अलक्त एव, अलक्तः स्वार्थे कन् ।) निर्भर्त्सनं । अलक्तः । इति हलायुधो हारावली च ॥ लाक्षा । इति राजनिर्घण्टः ॥ ("अलक्तकाङ्कानि पदानि पादयोः" । इति कुमारसम्भवे ।
"पादालक्तकरक्तमौक्तिकशिलःसिद्धाङ्गनानाङ्गतैः"
इति नागानन्दे ।)

अलगर्दः, पुं, (लगति स्पृशति, क्विप्, लग्, अर्द्दयति, अर्द्द + अच्, अर्दः, लग् चासौ अर्दश्चेति इति लगर्दः, लग्नः सन् पीड़क इत्यर्थः, निर्व्विषत्वात् तद्भिन्नः ।) जलसर्पः । जलबोड़ा इति केचित् । अलाध इति केचित् । इत्यमरटीकायां भरतः ॥ (सविषो जलव्यालभेदः । विलकेउटिया इति भाषा, "तत्र सविषाः कृष्णाः कर्व्वुरा अलगर्द्दा इन्द्रायुधाः सामुद्रिका गोचनन्दाः चेति"। सुश्रुते ।)

अलगर्द्दः, पुं, (अलं गर्द्धयति इति गृध + अच्, पृषोदरादित्वात् साधुः ।) जलव्यालः । इत्यमरः ॥ केउटिया इति ख्यातः । जलबोड़ा इति केचित् । अलाध इति केचित् । इति भरतः ॥

अलङ्करणं, क्ली, (अलम् + कृ + भावे ल्युट् ।) भूषणं । इति शब्दरत्नावली ॥

अलङ्करिष्णुः, त्रि, (अलम् + कृ + इष्णुच् ।) अलङ्कारकर्त्ता । भूषणशीलः । इति रघुनाथचक्रवर्त्यादयः ॥ तत्पर्य्यायः । मण्डनः २ । इत्यमरः ॥ अलङ्कर्त्ता ३ । इति शब्दरत्नावली ॥*॥ अलङ्कारयुक्तव्यक्तिः । इति सारसुन्दर्य्यादयः ॥ तत्पर्य्यायः । अलंकर्त्ता २ मण्डितः ३ प्रसाधितः ४ अलङ्कृतः ५ भूषितः ६ परिष्कृतः ७ । इत्यमरः ॥

अलङ्कर्त्ता, [ऋ] त्रि, (अलम् + कृ + तृच् ।) अलङ्करिष्णुः । इत्यमरः ॥

अलङ्कर्म्मीणः, त्रि, (अलं समर्थः कर्म्मणे, खः ।) कार्य्यकुशलः । कर्म्मक्षमः । इत्यमरः ॥

अलङ्कारः, पुं, (अलम् + कृ + भावे घञ् ।) भूषणं । तत्पर्य्यायः । आभरणं २ परिष्कारः ३ विभूषणं ४ मण्डनं ५ । इत्यमरः ॥ अलङ्क्रिया ६ भूषा ७ अलङ्करणं ८ । इति शब्दरत्नावली । कलापः ९ इति जटाधरः ॥*॥ अथालङ्कारयुक्तिः । तद्धारणादिनमुच्यते ।
"रेवत्यश्विधनिष्ठासु हस्तादिष्वपि पञ्चसु ।
गुरुशुक्रबुधस्याह्नि वस्त्रालङ्कारधारणं ॥
अनिष्टेष्वपि निर्दिष्टं वस्त्रालङ्कारधारणम् ।
उद्वाहे राजसम्माने ब्राह्मणानाञ्च सम्मते ॥
शिरस्त्रं मुकुटं हारः कुण्डलञ्चाङ्गदन्तथा ।
कङ्कणं बालकश्चैव मेखलाष्टाविति क्रमात् ॥
प्रधानभूषणान्येषु यथासंख्यानि निश्चयः ।
पद्मरागश्च वज्रञ्च विजयो गोविदास्तथा ॥
मुक्ता वैदूर्य्यनीलञ्च तथा मरकतं क्रमात् ।
आदित्यादिदशाजानां सर्व्वसम्पत्तिदायकाः ॥
सुवर्णेनापि घटना सर्व्वेषामुपयुज्यते ।
प्रधानभूषणेष्वेवमप्रधाने न निर्णयः ॥
प्रधानभूषणं प्रायः शिरसो ह्यभिधीयते ।
तस्य प्रधानभूषत्वादित्याह भृगुनन्दनः ॥
सुखदा मणयः शुद्धा दुःखदा दोषशालिनः ।
अतो मणीनां वक्ष्यामि लक्षणानि यथाक्रमं" ॥